# चाक्षुषोपनिषत्

विनियोगः

ॐ अस्याः श्री चाक्षुषीविद्याया अहिर्बुध्न्य ऋषिर्गायत्री छन्दः

सूर्यो देवता चक्षूरोगनिवृत्तये विनियोगः।

ॐ चक्षुः चक्षुः चक्षुः तेजः स्थिरो भव।

मां पाहि पाहि। त्वरितं चक्षूरोगान् शमय शमय।

मम जातरूपं तेजो दर्शय दर्शय।

यथा अहम् अन्धो न स्यां तथा कल्पय कल्पय।

कल्याणं कुरु कुरु।

यानि मम पूर्वजन्मोपार्जितानि चक्षुः प्रतिरोधकदुष्कृतानि सर्वाणि निर्मूलय निर्मूलय।

ॐ नमः चक्षुस्तेजोदात्रे दिव्याय भास्कराय।

ॐ नमः करुणाकरायामृताय। ॐ नमः सूर्याय।

ॐ नमो भगवते सूर्यायाक्षितेजसे नमः।

खेचराय नमः। महते नमः। रजसे नमः। तमसे नमः।

असतो मा सद्गमय। तमसो मा ज्योतिर्गमय। मृत्योर्मा अमृतं गमय।

उष्णो भगवाञ्छुचि रूपः। हंसो भगवान् शुचिरप्रतिरूपः।

य इमां चाक्षुष्मती विद्यां ब्राह्मणो नित्यमधीते न तस्याक्षिरोगो भवति। न तस्य कुले अन्धो भवति।

अष्टौ ब्राह्मणान् सम्यग्ग्राहयित्वा विद्यासिद्धिर्भवति।

ॐ नमो भगवते आदित्याय अहोवाहिनी अहोवाहिनी स्वाहा।

॥ श्री कृष्णयजुर्वेदीया चाक्षुषीविद्या सम्पूर्णा॥

## Cākṣuṣopaniṣat

**viniyogaḥ**
om asyāḥ śrīī cākṣuṣīvidyāyā ahirbudhnya ṛṣirgāyatrī chandaḥ
sūryo devatā cakṣūroganivṛttaye viniyogaḥ ।

**om** cakṣuḥ cakṣuḥ cakṣuḥ tejaḥ sthiro bhava ।
māṁ pāhi pāhi । tvaritaṁ cakṣūrogān śamaya śamaya ।
mama jātarūpaṁ tejo darśaya darśaya ।
yathā aham andho na syāṁ tathā kalpaya kalpaya ।
kalyāṇaṁ kuru kuru ।
yāni mama pūrvajanmopārjitāni cakṣuḥ pratirodhakaduṣkṛtāni sarvāṇi nirmūlaya nirmūlaya ।

om namaḥ cakṣustejodātre divyāya bhāskarāya ।
om namaḥ karuṇākarāyāmṛtāya । om namaḥ sūryāya ।
om namo bhagavate sūryāyākṣitejase namaḥ ।
khecarāya namaḥ । mahate namaḥ । rajase namaḥ । tamase namaḥ ।
asato mā sadgamaya । tamaso mā jyotirgamaya । mṛtyormā amṛtaṁ gamaya ।
uṣṇo bhagavāñchuci rūpaḥ । haṁso bhagavān śucirapratirūpaḥ ।

ya imāṁ cākṣuṣmatī vidyāṁ brāhmaṇo nityamadhīte na tasyākṣirogo bhavati ।
na tasya kule andho bhavati ।
aṣṭau brāhmaṇān samyaggrāhayitvā vidyāsiddhirbhavati ।
om namo bhagavate ādityāya ahovāhinī ahovāhinī svāhā ।

।। śrīī kṛṣṇayajurvedīyā cākṣuṣīvidyā sampūrṇā ।।